# narayana upanishad

ॐ सह नाववतु।

om saha nāvavatu |

सह नौ भुनक्तु।

saha nau bhunaktu |

सह वीर्यं करवावहै।

saha vīryaṁ karavāvahai |

तेजस्वि नावधीतमस्तु मा विद्विषावहै।

tejasvi nāvadhītamastu mā vidviṣāvahai |

ॐ शान्तिः शान्तिः शान्तिः ॥

om śāntiḥ śāntiḥ śāntiḥ ||

ॐ अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति ।

om atha puruṣo ha vai nārāyaṇo'kāmayata prajāḥ sṛjeyeti |

नारायणात्प्राणो जायते।

nārāyaṇātprāṇo jāyate |

मनः सर्वेन्द्रियाणि च।

manaḥ sarvendriyāṇi ca |

खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी।

khaṁ vāyurjyotirāpaḥ pṛthivī viśvasya dhāriṇī |

नारायणाद् - ब्रह्मा जायते।
nārāyaṇād - brahmā jāyate ।

नारायणाद् - रुद्रो जायते।
nārāyaṇād - rudro jāyate ।

नारायणादिन्द्रो जायते।
nārāyaṇādindro jāyate ।

नारायणात्प्रजापतयः प्रजायन्ते।
nārāyaṇātprajāpatayaḥ prajāyante ।

नारायणाद्द्वादशादित्या रुद्रा वसवस्सर्वाणि च छन्दाग्ंसि।
nārāyaṇāddvādaśādityā rudrā vasavassarvāṇi ca chandāgṁsi ।

नारायणादेव समुत्पद्यन्ते।
nārāyaṇādeva samutpadyante ।

नारायणे प्रवर्तन्ते।
nārāyaṇe pravartante ।

नारायणे प्रलीयन्ते।
nārāyaṇe pralīyante ।

ॐ। अथ नित्यो नारायणः।
om । atha nityo nārāyaṇaḥ ।

ब्रह्मा नारायणः।
brahmā nārāyaṇaḥ ।

शिवश्च नारायणः ।

śivaśca nārāyaṇaḥ ।

शक्रश्च नारायणः ।

śakraśca nārāyaṇaḥ ।

द्यावापृथिव्यौ च नारायणः ।

dyāvāpṛthivyau ca nārāyaṇaḥ ।

कालश्च नारायणः ।

kālaśca nārāyaṇaḥ ।

दिशश्च नारायणः ।

diśaśca nārāyaṇaḥ ।

ऊर्ध्वश्च नारायणः ।

ūrdhvaśca nārāyaṇaḥ ।

अधश्च नारायणः ।

adhaśca nārāyaṇaḥ ।

अन्तर्बहिश्च नारायणः ।

antarbahiśca nārāyaṇaḥ ।

नारायण एवेदगं सर्वम् ।

nārāyaṇa evedagṁ sarvam ।

यद्भूतं यच्च भव्यम् ।

yadbhūtaṁ yacca bhavyam ।

निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो दे॒व एको॑ नारायणः ।

niṣkalo nirañjano nirvikalpo nirākhyātaḥ śuddho deva eko̍ nārāya̱ṇaḥ |

न द्वि॒तीयो᳚ऽस्ति॒ कश्चि॑त् ।

na dvi̱tīyo̎'sti̱ kaści̍t |

य ए॑वं वे॒द ।

ya e̍vaṁ ve̱da |

स विष्णुरेव भवति स विष्णुरे॑व भ॒वति ॥

sa viṣṇureva bhavati sa viṣṇure̍va bha̱vati ||

ओमित्य॑ग्रे व्या॒हरेत् ।

omitya̍gre vyā̱haret |

नम इ॑ति प॒श्चात् ।

nama i̍ti pa̱ścāt |

ना॒रा॒य॒णायेत्यु॑परि॒ष्टात् ।

nā̱rā̱ya̱ṇāyetyu̍pari̱ṣṭāt |

ओमि॑त्ये॑का॒क्षरम् ।

omi̍tye̍kā̱kṣaram |

नम इति॑ द्वे अ॒क्षरे ।

nama iti̍ dve a̱kṣare |

ना॒रा॒य॒णायेति पञ्चा᳚क्षरा॒णि ॥

nā̱rā̱ya̱ṇāyeti pañcā̎kṣarā̱ṇi ||

एतद्वै नारायणस्याष्टाक्षरं पदम् ।

etadvai nārāyaṇasyāṣṭākṣaraṁ padam ।

यो ह वै नारायणस्याष्टाक्षरं पदमध्येति ।

yo ha vai nārāyaṇasyāṣṭākṣaraṁ padamadhyeti ।

अनपब्रुवस्सर्वमायुरेति ।

anapabruvassarvamāyureti ।

विन्दते प्राजापत्यगं रायस्पोषं गौपत्यम् ।

vindate prājāpatyagṁ rāyasposaṁ gaupatyam ।

ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति ।

tato'mṛtatvamaśnute tato'mṛtatvamaśnuta iti ।

य एवं वेद ।

ya evaṁ veda ।

प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपम् ।

pratyagānandaṁ brahma puruṣaṁ praṇavasvarūpam ।

अकार उकार मकार इति ।

akāra ukāra makāra iti ।

तानेकधा समभरत्तदेतदोमिति ।

tānekadhā samabharattadetadomiti ।

यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् ।

yamuktvā mucyate yogī janmasaṁsārabandhanāt ।

ॐ नमो नारायणायेति मन्त्रोपासकः ।

om namo nārāyaṇāyeti mantropāsakaḥ ।

वैकुण्ठभुवनलोकं गमिष्यति ।

vaikuṇṭhabhuvanalokaṁ gamiṣyati ।

तदिदं परं पुण्डरीकं विज्ञानघनम् ।

tadidaṁ paraṁ puṇḍarīkaṁ vijñānaghanam ।

तस्मात्तदिदावन्मात्रम् ।

tasmāttadidāvanmātram ।

ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनोम् ।

brahmaṇyo devakīputro brahmaṇyo madhusūdanom ।

सर्वभूतस्थमेकं नारायणम् ।

sarvabhūtasthamekaṁ nārāyaṇam ।

कारणरूपमकार परब्रह्मोम् ।

kāraṇarūpamakāra parabrahmom ।

एतदथर्व शिरोयोऽधीते । प्रातरधीयानो रात्रिकृतं पापं नाशयति ।

etadatharva śiroyo'dhīte । prātaradhīyāno rātrikṛtaṁ pāpaṁ
nāśayati ।

सायमधीयानो दिवसकृतं पापं नाशयति ।

sāyamadhīyāno divasakṛtaṁ pāpaṁ nāśayati ।

माध्यन्दिनमादित्यभिमुखोऽधीयानः

mādhyandinamādityabhimukho'dhīyānaḥ

पञ्चपातोकोपपातकात्प्रमुच्यते ।

pañcapātokopapātakātpramucyate |

सर्व वेद पारायनण पुण्यं लभते ।

sarva veda pārāyananạ puṇyaṁ labhate |

नारायणसायुज्यमवाप्नोति नारायण सायुज्यमवाप्नोति ।

nārāyaṇasāyujyamavāpnoti nārāyaṇa sāyujyamavāpnoti |

य एवं वेद । इत्युपनिषत् ।

ya evaṁ veda | ityupaniṣat |

ॐ सह नाववतु।

om saha nāvavatu |

सह नौ भुनक्तु।

saha nau bhunaktu |

सह वीर्यं करवावहै ।

saha vīryaṁ karavāvahai |

तेजस्वि नावधीतमस्तु मा विद्विषावहै ।

tejasvi nāvadhītamastu mā vidviṣāvahai |

ॐ शान्ति शान्ति शान्तिः ॥

om śānti śānti śāntiḥ ||

* * * * * * * * *